योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्याञ्च विशेषतः ।
प्रगल्भान्तु जगद्धात्रीं पूजयेद्दीपमालया ॥"
आगमतत्त्वसारे ।
"कार्त्तिकेऽमलपक्षे तु नवम्यां भौमवासरे ।
आविर्भूता जगद्धात्री युगादौ दैत्यनाशिनी ॥"
उत्तरकामाख्यातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि ।
त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्पत्प्रवृद्धये ॥"*॥
कुलिकातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥"*॥
दुर्गाकल्पे विद्योत्पत्तिः ।
"कार्त्तिके शुक्लपक्षेऽह्नि भौमवारे जगत्प्रसूः ।
सर्व्वदेवहितार्थाय दुर्वृत्तशमनाय च ॥
आविरासीज्जगच्छान्त्यै युगादौ परमेश्वरी ॥"
व्रतकालविवेकधृतवचनम् ।
"कार्त्तिकेऽमलपक्षस्य त्रेतायां नवमेऽहनि ।
पूजयेत्तां जगद्धात्रीं सिंहपृष्ठे निषेदुषीम् ॥"*॥
स्मृतिः ।
"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥"*॥
कृत्यतत्त्वार्णवे ।
"कार्त्तिकेऽमलपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये तत्र पूजाविधिरिहोदितः ॥"*॥
भविष्यपुराणकृत्यतत्त्वार्णवयोः ।
"कार्त्तिके शुक्लपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये काष्ठात्मिका परदिने यदि ॥
तत्र पूजादिकं कुर्य्यात् पिण्डनिर्व्वपणादृते ॥"
स्मृतिसागरे ।
"कार्त्तिकस्य युगाद्यायामृद्धिकामोऽर्चयेदुमाम् ॥"
इति जगद्धात्रीपूजाकालव्यवस्था ॥ * ॥ * ॥
अथ जगद्धात्रीविद्योत्पत्तिः ।
श्रीपार्व्वत्युवाच ।
"भगवन् ! प्राणनाथेश ! सर्व्वतत्त्वविशारद ! ।
श्रुता कात्यायनीविद्यासमुत्पत्तिस्त्रिलोचन ! ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिर्भवेद्यतः ।
तत् सर्व्वं ब्रूहि भगवन् ! कृपया परमेश्वर ! ॥
यदि न कथ्यते देव ! विमुञ्चामि तदा तनुम् ॥
श्रीशिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि रहस्यं परमाद्भुतम् ।
यत् श्रुत्वा लभते देवि ! सौभाग्यं सुखमुत्तमम् ॥
पुरा पुरन्दरमुखाः स्वेश्वरत्वाभिमानिनः ।
प्राहुः किमीश्वरोऽस्त्यस्मदतिरिक्तः सुरानिति ॥
अथ दुर्गा जगन्माता नित्या चैतन्यरूपिणी ।
एतेषां धर्म्मसेतूनामिन्द्रादीनां नियन्तृणाम् ॥
करिष्यामीति निश्चित्य ज्योतीरूपं दधात्वलम् ।
तेषामाविरभूद्दुर्गा जगद्धात्री जगन्मयी ॥
कोटिसूर्य्यप्रतीकाशा चन्द्रकोटिसमप्रभा ।
ज्वलन्तं पर्व्वतमिव सर्व्वलोकभयङ्करी ॥
तद्दृष्ट्वा सुराः सर्व्वे भयमापुर्महौजसः ।
किमेतन्न विनिश्चेतुं शक्तास्ते ह्यभवन् सुराः ॥
वायुमाहुः समाहूय किमेतत् परमाद्भुतम् ॥
विजानीहि मरुद्वीर ! मातरिश्वा दिशःपते ! ॥
ततो वायुर्द्रुतं तत्र गतस्तेजोऽन्तिकं ततः ।
तमन्तिकमुपायातं प्राह तेजोमयी ततः ॥
बलवान् कस्त्वमायातो वीर्य्यं किञ्चास्ति वा त्वयि ।
आदातुं शक्यते सर्व्वं पृथिवीतलसम्भवम् ॥
इति प्रत्युक्तवान् वायुः क्षणं तत्रैव तिष्ठति ।
आदत्स्वैतत् तृणमिति निदधौ वायवे तृणम् ॥
वायुः सर्व्वप्रयत्नेन नादातुं तत् क्षमोऽभवत् ।
ततो देवाः प्राहुरग्निं भीता उद्विग्नमानसाः ॥
अग्ने ! एतद्विजानीहि किमेतत् कर्म्म चाद्भुतम् ।
इत्युक्तो देवतावृन्दैरग्निस्तेजोऽन्तिकं गतः ॥
अमरा जातवेदा वा तेजो वागित्युवाच तम् ।
स प्रोक्तवानग्निरस्मि सर्व्वदाहकशक्तिकः ॥
दहैतत्तृणमत्यल्पमिति तस्मै तृणं ददौ ।
अग्निः सर्व्वप्रयत्नेन दग्धुं नैतत् क्षमोऽभवत् ॥
ततो निवृत्ते वह्निर्भूत्वा सोऽपत्रपान्वितः ।
एकत्रस्थाः सुराः सर्व्वे मन्त्रयामासुरुत्तमम् ॥
इयमेवेश्वरी नूनं स्तोष्यामो नेश्वरा वयम् ।
इति निश्चित्य सुधियस्तुष्टुवुः परमेश्वरीम् ॥
प्राहुर्देवगणाः सर्व्वे त्वमीशा नेश्वरा वयम् ।
ईश्वरत्वाभिमानेन यदस्माकं सुदुष्कृतम् ॥
क्षन्तुमर्हसि तत् सर्व्वं कृपया जगदम्बिके ! ।
तव रूपं सुगोप्यं यन्मङ्गल्यं सर्व्वमङ्गलम् ॥
तद्द्रष्टुं वयमिच्छामो देहि दर्शनमुत्तमम् ।
इत्युक्तानां सुबुद्धीनामाविरासीच्छिवाम्बरे ॥
तेजस्यन्तर्हिते तस्मिन् चमत्कारकलेवरे ।
मृगेन्द्रोपरि सुस्मेरा सर्व्वालङ्कारभूषिता ॥
चतुर्भुजा महादेवी रक्ताम्बरधरा शुभा ।
बालार्कसदृशीदेहा नागयज्ञोपवीतिनी ॥
त्रिनेत्रा कोटिचन्द्राभा देवर्षिमुनिसेविता ।
दर्शयामास देवानामेवं रूपं जगन्मयी ॥
ततस्तां तुष्टुवुर्देवा जगद्धात्रीं महेश्वरीम् ।
वरं प्रापुः सुरगणा यथेष्टं त्रिदशालये ॥
तत्रैवान्तर्हिता देवी महादुर्गा जगन्मयी ।
इति ते कथितं भद्रे ! विद्योत्पत्तिं सुदुर्लभाम् ॥"
इति कात्यायनीतन्त्रे ७६ पटलः ॥ * ॥
श्रीशिव उवाच ।
"अथ दुर्गामनुं वक्ष्ये शृणुष्व हरवल्लभे ! ।
यस्य प्रसादमात्रेण मुच्यते भवबन्धनात् ॥
यान्तवर्णं समुद्धृत्य वामकर्णं विभूषितम् ।
इन्दुबिन्दुसमायुक्तं बीजं परमदुर्लभम् ॥
चतुर्व्वर्गप्रदं साक्षान्महापातकनाशनम् ।
एकाक्षरीसमा नास्ति विद्या त्रिभुवने प्रिये ! ॥
कूर्च्चाद्यां वा जपेद्विद्यां तदन्ते वह्निसुन्दरी ।
लज्जाद्यां वा जपेद्विद्यां फडन्तं वा जपेत् सुधीः ॥
वधूबीजयुतां वापि स्वाहान्तां वा जपेत् पुनः ।
लक्ष्म्याद्यां वा जपेद्विद्यां चतुर्व्वर्गफलाप्तये ॥
वाग्भवाद्यां जपेद्वापि प्रणवाद्यां जपेत् पुनः ।
कामबीजादिकां वापि फडन्तां वा जपेत् पुनः ॥
षडक्षरी विविधा विद्या कथिता ब्रह्मणा पुरा ।
विना गन्धैर्विना पुष्पैर्विना होमपुरःसरैः ॥
प्राणायामं विना देवि ! जपमात्रेण सिद्धिदा ।
मन्त्रस्यास्य ऋषिर्देवि ! नारदः परिकीर्त्तितः ॥
गायत्री छन्द आख्यातं जगद्धात्री च देवता ।
चतुर्व्वर्गप्रदा दुर्गा सर्व्वसत्त्वेषु संस्थिता ॥
दीर्घस्वरसमायुक्तनिजबीजानि पार्व्वति ! ।
विन्यसेदात्मनो देहे हृदयादिषु शङ्करि ! ॥
पूर्व्ववन्न्यासवर्णन्तु पूर्व्ववत् कर्म्म चाचरेत् ।
कालीवदाचरेद्विद्यां जपेद्विद्यामहर्निशम् ॥
लक्षद्वादशकैर्देवि ! पुरश्चरणमीरितम् ।
यथास्थाने यथाकाले यथाचारविधानतः ॥
प्रजपेत् परया भक्त्या दुर्गां दुर्गतिनाशिनीम् ॥*॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व नगनन्दिनि ! ॥
सिंहस्कन्धाधिसंरूढ़ां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्व्बाणलोचनत्रितयान्विताम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशीतनुम् ॥
नारदाद्यैर्मुनिगणैः सेवितां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालम्टणालिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ॥
प्रफुल्लकमलारूढ़ां ध्यायेत्तां भवगेहिनीम् ।
एवं ध्यात्वा जगद्धात्रीं पूर्व्वोक्तपूजनं चरेत् ॥
यन्त्रमस्याः प्रवक्ष्यामि शृणुष्व हरवल्लभे ! ।
त्रिकोणत्रितयञ्चादौ त्रैबिम्बसहितन्ततः ॥
अष्टपत्रं ततो लिख्य त्रिरेखासहितं ततः ।
वज्रभूपुरसंयुक्तं विलिखेद्विधिनामुना ॥
तत्र तां पूजयेद्देवीं मूलप्रकृतिरूपिणीम् ।
प्रभाद्याः शक्तयः पूज्या गन्धाद्यैर्नवकोणके ॥
प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी पुनः ।
सुप्रभा विजया सर्व्वसिद्धिदा नव शक्तयः ॥
ह्रीमाद्याः पूजयेत्तास्तु रक्तचन्दनदूर्व्वकैः ।
शङ्खपद्मनिधी देव्या वामदक्षिणयोगतः ॥
पूजयेत् परया भक्त्या रक्तचन्दनदूर्व्वकैः ।
अर्घ्यप्रदानं ततः कुर्य्यात् पूजान्ते नगनन्दिनि ! ॥
अङ्गावृतिः पुनः पूज्या पत्रकोणेषु मातरः ।
वज्राद्यायुधसंयुक्ता भूपुरे लोकनायकाः ॥"
इति कात्यायनीतन्त्रे ७७ पटोलः ॥ * ॥
श्रीशिव उवाच ।
"पूजा तिथिविशेषेण चतुर्व्वर्गफलाप्तये ।
कर्त्तव्या या तु दुर्गायास्तां शृणुष्व शुभानने ! ॥
अष्टम्याञ्च चतुर्द्दश्यां नवम्यां वापि यत्नतः ।
यः पूजयेन्महादुर्गां सोऽभीष्टफलमाप्नुयात् ॥
पौर्णमास्याममायां वा रविसंक्रमणे तथा ।
शनिभौमदिने चैव पूजयेत् परमेश्वरीम् ॥
सुखं सौभाग्यमारोग्यमैश्वर्य्यं लभते ध्रुवम् ।
शनिभौमदिने चैव यदि स्यादष्टमी तिथिः ॥
तत्र पूज्या जगद्धात्री पुत्त्रपौत्त्रधनप्रदा ।
सोमवारेऽप्यमावास्या मघानक्षत्रसंयुता ॥
उत्तरा सप्तमीयुक्ता चादित्याहे च पार्व्वति ! ।
चतुर्थ्यङ्गारवारे च रोहिणीसंयुता यदि ॥
गुर्व्वष्टम्यां तथा स्वाती यदि स्यात् परमेश्वरि
एषु पूजा महादेव्याः कर्त्तव्या सर्व्वसिद्धये ॥
मधुमासे सिताष्टम्यां वैशाखत्रितयेऽहनि ।